बहुव्रीहिसमासनिरूपणम्


१०२

उपनामी

१६

नं. १०२४
बहुश्री हिसमाह निरवक्षर्
रुपनामी
नामवर्ष

अहमदि



बहुश्री हिसमाह नारखा
६०

बहुव्रीहि·
१

॥श्रीगणपतेनमः। वाक्यत्वंसाकांक्षेतरघटितत्वेसतिसुवंतबहुव्रीहिपाकपदकत्वं· प्राप्तमुदकंयं· छिन्नःक
रोयेनेतिकरणे· पक्वस्तंडुलोयेनेतिकर्तरि· दत्तादक्षिणायस्मै· पतितंपत्रंयस्मात्· चित्रागावोयस्य· रक्तःप
टोयत्रेत्यादौयत्कर्मकप्राप्तिकर्मोदकंयत्करणकछेदनकर्मकः यत्कर्तृकपाककर्मतंडुलः यत्संप्रदानकक कदान
र्मदक्षिणा· यदवधिकपतनकर्मपत्रंयत्संबंधिन्यश्चित्राभिन्नगावः यद्वृत्तिरक्तपटइत्यादिबोधकेसुवंतबहु
व्रीहिघटकपदकेसाकांक्षेतरद्वितीयादिपदघटितत्वमविशिष्टं· उपदशाः पतंगाइत्यादौदशानांसमीपेद
शानांसमीपेयेइत्यादिवनिविग्रहः किंतुउपदशयेषामित्यादिः गणितत्वस्यषष्ठ्यर्थत्वाद्ग्रहणातसमी
पदशत्ववतांबोधइतिनायोग्यता। अथैवंबहुव्रीहिः प्राचीनोक्तंनित्यसमासत्वंभज्येतेतिचेन्न अस्वपदवि
ग्रहइत्यस्यस्वघटकपदभिन्नपदघटितइत्यर्थात् वस्तुतोबहुव्रीहेर्नित्यसमासत्वमयुक्तमेवस्वघटक श्री०
यावत्पदघटितविग्रहकान्यइतितदर्थइत्यन्यत्रविस्तरः उपदशायेइत्यादिस्त्विष्यतएव· ननुप्रथमार्थेना १

न्यपदार्थः अन्यथा वृष्टे देवे गत इत्यस्यापि विग्रहः स्यादिति चेन्न· अन्यपदार्थस्तु वंतबहुव्रीहिपदार्थो बहुव्री
हित्वं परिचायकं बोधानुकूलायाः समभिव्याहारविशेषरूपाया आकांक्षाया इतरपदे ऽसत्त्वात् सत्त्वा
च्चोपदर्शयेद् इत्यादौ· एतेनारूढो वानरो यस्य वृक्षमित्यस्यापि समाहितं· यस्येत्यस्य वृक्षे ऽन्वयेन तादृशाकां
क्षाया असत्त्वात्· अत एव द्वौ वा त्रयो वा· द्वित्रा इत्यत्र न स्यादिति कोपि सः उभयवैशिष्ट्यावगाहित्वोक्ताच
हं उादंडि मुष्टामुष्टी स्यादौ हस्ताहस्ति केशाकेशी स्यादौ दंडैर्दंडैः मुष्टिभिर्मुष्टिभिश्च प्रहृत्य हस्तेषु ह
स्तेषु केशेषु केशेषु च गृहीत्वा वेदं वृत्तमित्यादौ नां संग्रहः· अत्र हि वृत्ते दंडादीनामन्वयः· तत्र प्रहरणग्रह
णयोरुच्चरत्वबोधनाय परं तथाविधोक्तिः· अत एवान्यपदार्थावच्छिन्नतादृशबोधत्वमपि नोक्तं· वृष्टे देवे
गत इत्यादौ च सप्तम्यर्थस्य समानकालीनत्वस्य धात्वर्थ एवान्वयान्नानुपपत्तिः· यद्विच प्रहरणान्वयिकर
णत्वप्रत्यायिके च दंडादंडि इति तृतीया· ग्रहणान्वय्यधिकरणत्वबोधिका च केशेषु केशेष्विति सप्तमी

तथा सत्येवाकांक्षोपशमादित्युच्यते तदापि बहुव्रीह्यर्थघटकयावदर्थानुपस्थितौ यदितरपदं यादृशसम
भिव्याहाराभावमपेक्षते तत्र तत्समभिव्याहार एव साकांक्षता· प्रकृते च दंडादंडीत्यादौ अंश पदस्य लक्षणाया दृ
दंडकरणकप्रहरणोत्तरावृत्तमर्थः तद्घटकदंडाद्युपस्थापकत्वं प्रहृत्यहृत्तमितस्य दंडैरिति तृतीयांतत्वेनैवे
तिना संग्रहः एवमन्यत्राप्यूह्यं· आरूढो वानरो यस्य वृक्षस्येत्यादिस्तु यद्वृक्षकर्मकारोहणकर्तृवानरत्वेन
वोधे साकांक्षोपि वानरकर्तृकारोहणकर्मवृक्षसंस्थादिस्तु यद्वृक्षकर्मकारोहणकर्तृवंधित्वेनत्रा यं भावं
मादिवोधकबहुव्रीहेरप्युत्पन्नतया तादृशानुपस्थितौ नापेक्षत एवेतरपदं तादृशसमभिव्याहारात्कर्मका
रोहरूपमिति नातिव्याप्तिः· एवं वृक्षे देवेगत इत्यत्रापि वोध्यं· आरूढोयं इत्यादिभागे तादृशभावं यत्किं
चिदर्थोपस्थितिः आरूढादिसाचिव्यादेवेति तद्वारणाय यावदिति· तादृशानुपस्थितौ तादृशस श्री·
मभिव्याहाराभावो न प्रयोजक इति नातिव्याप्तिः· यादृशसमभिव्याहृतमितरपदं तादृशयावदर्थोपस्था २
पकमिति तु न वाच्यं· आरूढो वानरो यस्य वृक्षमित्यादावारूढो वानरो वृक्षमिति भागमादाय तिव्याप्तेः· यदितर·

पदवृत्तियादृशसमभिव्याहृतत्वं तादृशयावदर्थोपस्थापकतावच्छेदकं वा साकांक्षता· आरूढो वानरोय
स्य वृक्षमित्यादौ च वृक्षमित्यत्र यस्य वृक्षमित्यत्र वा रूढो वानरो यस्येति आरूढो वानरः इति वा समभिव्याहृ
तत्वं नोपस्थापकतावच्छेदकमिति नातिव्याप्तिः· यत्त्वस्यैकं प्रथमान्तं यत्सुबंतमितरैः सह भेदार्थ
कसुबंतेन साकांक्षं नाम विग्रहः· अस्य बहुव्रीहेः· चक्रं पाणौ यस्येत्यादि संग्रहायैकमिति तन्न दंडैश्च
दंडैश्चेत्याद्यव्यापकत्वात्· ॥ ॥श्रीः वृत्त्यर्थावबोधकं वाक्यं विग्रहः· वृत्त्यर्थबोधसमानाकारबोधजन
कत्वमिति वाक्यत्वं तदर्थः· वृत्त्यावतिप्रसंगवारणाय विशेष्यं· तत्वं च सुबंतवृत्तिघटकयावच्छब्दकत्वं· सु
बंतावृत्तिघटकयावच्छब्दायत्रेति व्युत्पत्त्या तादृशशब्देषु सुबंतत्वलाभात्तस्तोकान्मुक्त इत्याद्यलुग्वृ
त्तौ नातिप्रसंगः· अत एव च कात्स्न्यार्थकं यावत्पदमपि पक्वापक्वमित्यादौ च पाकस्य कर्त्ता पाकस्य
कर्मेत्यादिरेव विग्रहो न तु पचति पच्यते इत्यादिः· घटकत्वं च तद्विषयकप्रतीतिविषयत्वं घटि

२ त्वंचतद्विषयकप्रतीत्यविषयत्वं तदनुरोधाच्च शब्दपदं सार्थकपरं वृत्तिघटकीभूतं पदन्सार्थकं तत्तद्घट
3 टकंतत्वंवृत्तिघटकीभूतपदार्थतावच्छेदकावच्छिन्नबोधकत्वं तयावत्पदघटितत्वमितिनिष्कर्षः पा
कस्यकर्त्रेत्यादौपक्केत्यादिवृत्तिघटकीभूतपदार्थतावच्छेदकंपाकत्वंकृतिश्चतदवच्छिन्नबोधकत्वंत
त्वेयावत्पदकत्वमविशिष्टमेवप्रसिद्धावस्थापन्नत्वोपरागेणबोधेपिपाकत्वादौपाकपदबोध्यतावच्छे
दकतास्वरूपसंबंधरूपाऽऽसक्ता अतएववीणायोरुपगानंकरोतीत्यादिरेवोपवीणयतीत्यादौविग्रह
स्स्वरससिद्धः तिङः तस्यवृत्तित्वाभावेनविनाकरोतीत्यस्यनिवेशनंएपतविग्रहत्वस्यसंभवात् अ
र्थश्चलक्ष्योपितेनविज्ञानस्याप्रयोविज्ञत्वादौनक्षतिः पाकस्येतिभागवारणायफलतोयावत्व
स्यार्थतावच्छेदकेऽन्वयात् कर्त्रेत्यादौचकृतिमानित्यादिरेवस्तुलभः श्री०
२